## कन्थायाष्ठक् । (१०२/१३२२)

कन्थाशब्दात् ठक् प्रत्ययो भवति [1]शैषिकः । कान्थिकः ॥

## वर्णौ वुक् । (१०३/१३२३)

कन्थायाः इत्येव । [2]वर्णौ या कन्था तस्या वुक् प्रत्ययो भवति [3]शैषिकः । ठकोऽपवादः । वर्णुर्नाम नदः, [4]तत्समीपो देशो वर्णुः । तद्विषयार्थवाचिनः कन्थाशब्दादयं [5]प्रत्ययः । [6]तथाहि – जातं हिमवत्सु [7]कान्थकम् ॥

## अव्ययात् त्यप् । (१०४/१३२४)

अव्ययात् त्यप् प्रत्ययो भवति शैषिकः ।

अमेहक्वतसित्रेभ्यस्त्यद्विधिर्योऽव्ययात्स्मृतः ।
[8]निनिर्भ्यां ध्रुवगत्योश्च प्रवेशो नियमे तथा ॥ (म.भा. २.२९२)

अमात्यः । इहत्यः । क्वत्यः । [9]इतस्त्यः । तत्रत्यः । यत्रत्यः । परिगणनं किम् ? औपरिष्टः [10]पौरस्तः । [11]पारस्तः । वृद्धात्तु छो भवति । आरातीयः ।

[४३४] त्यब् नेर्ध्रुवे । (म. भा. २. २९३)

[12]नियतं ध्रुवम् नित्यम् ।

[४३५] निसो गते । (म. भा. २. २९३)

निर्गतो वर्णाश्रमेभ्यः निष्टयः चण्डालादिः ।

[४३६] [13]आविसश्छन्दसि । (म.भा. २.२९३)

आविस् शब्दाच् छन्दसि त्यप् प्रत्ययो भवति । 'आविष्ट्यो वर्धते चारुरासु' (ऋ. १.९५.५) ।

[४३७] [14]अरण्याण् णो वक्तव्यः । (म.भा.२.२९३)

आरण्याः सुमनसः ।

[४३८] [15]दूरादेत्यः । (म. भा.२. २९३)

दूरेत्यः पथिकः ।

[४३९] उत्तरादाहञ् । (म.भा. २. २९३)

औत्तराहम् ॥

---

1. शैषिक: नास्ति फ. 2. वर्णे क. 3. शैषिकः नास्ति फ. 4. तत्सामीप्यं वर्णः क. ह. 5. वुक् फ. 6. यथाहि ब. क. ड. फ. 7. कन्थकम् क. 8. अर्धमिदं नास्ति ब. क. ड. इ. फ. 9. नास्ति ब. फ, ततस्त्यः इकुतस्त्यः क. ड. इ. ह. 10. नास्ति ब. क. फ. 11. पारत: ब. क, अव्ययानां भमात्रे टिलोपः वक्तव्य इत्यधिकम् ड. इ. 12. नित्यं ब. 13. अविसः ब. 14. अरण्याण्णो वक्तव्यः नास्ति ब. 15. दुरादैत्यः ब.